# ह.वि.शि.बो. अभ्यासप्रश्नपत्रम् (मार्च-2025)

# विषय : संस्कृतम्

**कक्षा - द्वादशी** **कोड न. - 526**

**SET : A**

रोल नं० ☐☐☐☐☐☐☐☐☐☐

समयः - होरात्रयम् ] [ पूर्णाङ्काः - 80

---

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ 9 तथा प्रश्न 14 हैं।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गये कोड नम्बर तथा सेट को छात्र उत्तर पुस्तिका के मुख्य पृष्ठ पर लिखें।
- कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमाङ्क अवश्य लिखें।
- उत्तर-पुस्तिका के बीच में खाली पन्ना / पन्नें न छोड़ें।
- उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।
- परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें। रोल नं० के अतिरिक्त प्रश्न-पत्र पर अन्य कुछ भी न लिखें और वैकल्पिक प्रश्नों के उत्तरों पर किसी प्रकार का निशान न लगाएँ।
- कृपया प्रश्नों के उत्तर देनें से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।**

---

- **सामान्यनिर्देशाः :–**

I. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
II. प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
III. श्रेष्ठाङ्कान् प्राप्तये सुस्पष्टः लेखः लेखनीयः।

- **अस्मिन् प्रश्नपत्रे पञ्च खण्डाः सन्ति :–**

| | | |
|---|---|---|
| खण्डः 'क' | अपठित-अवबोधनम् | - 10 अङ्काः |
| खण्डः 'ख' | रचनात्मक-कार्यम् | - 17 अङ्काः |
| खण्डः 'ग' | पठित-अवबोधनम् | - 30 अङ्काः |
| खण्डः 'घ' | अनुप्रयुक्त-व्याकरणम् | - 06 अङ्काः |
| खण्डः 'ङ' | पाठाधारिताः बहुविकल्पीयाः प्रश्नाः | - 17 अङ्काः |

Downloaded from www.cclchapter.com

## खण्डः 'क'

# अपठित-अवबोधनम्

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि यथानिर्देशं संस्कृतेन लिखत - 10

अस्माकम् देशः प्राचीनकालादेव प्राकृतिक-पर्यावरणस्य पोषकः। वैदिककाले यद्यपि पर्यावरणस्य प्रदूषणस्य समस्या नासीत् तथापि वेदेषु स्थाने-स्थाने ऋषीणां पर्यावरणविषयकं चिन्तनं दृश्यते। अद्य पर्यावरण-प्रदूषणं संसारस्य भीषणतमा समस्या वर्तते, परं जनाः अस्याः गाम्भीर्यं न अनुभवन्ति। पर्यावरणं रक्षणीयं वृक्षाः रोपणीयाः रक्षणीयाः च इति शृण्वन्तः उद्घोषयन्तः अपि वयं प्रतिदिनं तेषां कर्तनं पश्यामः। 'प्लास्टिक' इति रसायनेन निर्मितवस्तूनि पर्यावरणाय हानिकराणि इति जानन्तः अपि जनाः एतेषां प्रयोगं बाहुल्येन कुर्वन्ति। पर्यावरणप्रदूषकं धूमं क्षिपतां वाहनानाम् औद्योगिक-यन्त्रागाराणां सङ्ख्या निरन्तरं वर्धमाना अस्ति। यद्यपि विकासाय नवीनाः आविष्काराः, अपेक्षिताः परं सञ्चाराय विस्तृताः सुरक्षिताः मार्गाः जनानां कृते अपि आवश्यकाः एव। यदि पर्यावरणं प्राणिजीवनाय अनुकूलं न भविष्यति तर्हि पृथिव्यां जीवनमेव असम्भवं भविष्यति तदा भौतिकनिकासेन किम्! अतः सर्वकारः जनसहयोगेन सर्वथा पर्यावरणरक्षणाय यत्नशीलः भवेदिति।

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 2×1=2

(क) के रोपणीयाः रक्षणीयाः च ?
(ख) कदा पर्यावरणस्य प्रदूषणस्य समस्या नासीत् ?
(ग) अस्माकं देशः कस्य पोषकः ?

(ब) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 2×2=4

(क) किं जानन्तः जनाः प्लास्टिक-निर्मितवस्तूनां प्रयोगं बाहुल्येन कुर्वन्ति ?
(ख) यदि पर्यावरणं प्राणिजीवनाय अनुकूलं न भविष्यति तर्हि किं भविष्यति ?
(ग) केषां सङ्ख्या निरन्तरं वर्धमाना अस्ति ?

(स) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। 1

(द) यथानिर्देशम् उत्तरत- ( केवलं प्रश्नत्रयम् ) 3×1=3

(i) 'जनाः अस्याः गाम्भीर्यं न अनुभवन्ति' अत्र किं क्रियापदम् ?
(क) जनाः (ख) अत्र
(ग) अस्याः (घ) अनुभवन्ति

(ii) 'नवीनाः' इति विशेषणपदस्य विशेष्यपदं किम् ?
(क) जनाः (ख) आविष्काराः
(ग) अपेक्षिताः (घ) मार्गाः

(iii) 'शोषकः' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम् ?
(क) विषयः (ख) चिन्तनीयः
(ग) सरलः (घ) पोषकः

(iv) 'वयं प्रतिदिनं तेषां कर्तनं पश्यामः।' अस्मिन् वाक्ये 'पश्यामः' क्रियायाः कर्तृपदं किं प्रयुक्तम् ?
(क) वयम् (ख) तेषाम्
(ग) प्रतिदिनम् (घ) कर्तनम्

Downloaded from www.cclchapter.com

## खण्डः 'ख'

## रचनात्मक-कार्यम्

2. विषयमेकमधिकृत्य पञ्चवाक्यानि संस्कृतभाषया लिखत - 5

(क) समयस्य सदुपयोगः

(ख) अनुशासनम्

(ग) संस्कृतभाषायाः महत्त्वम्

(घ) प्रातः कालीनभ्रमणम्

### (छन्द-अलङ्कार-परिचयः)

3. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत- (केवलं प्रश्नत्रयम्) 2×3=6

(क) वंशस्थछन्दसः लक्षणं किम्?

(ख) शिखरिणीछन्दसः उदाहरणं किम्?

(ग) मालिनीछन्दसि कति वर्णाः भवन्ति?

(घ) उक्ता ............................... तभजाजगौ गः । (लक्षणस्य रिक्तस्थानपूर्तिं कुरुत)

4. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत - (केवलं प्रश्नत्रयम्) 2×3=6

(क) अतिश्योक्तेः अलङ्कारस्य लक्षणं किम्?

(ख) उत्प्रेक्षायाः अलङ्कारस्य उदाहरणं किम्?

(ग) श्लेषालङ्कारस्य लक्षणं किम्?

(घ) ...................... शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्। (लक्षणस्य रिक्तस्थानपूर्तिं कुरुत)

## खण्डः 'ग'

## पठित-अवबोधनम्

5. अधोलिखितपद्यांशस्य हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत - 4×1=4

असूर्या नाम ते लोका अन्धेन तमसाऽऽवृताः ।
ताँस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥

Downloaded from www.cclchapter.com

**अथवा**

स मृण्मये वीतहिरणमयत्वात्
पात्रे निधायार्घ्यमनर्घशीलः ।
श्रुतप्रकाशं यशसा प्रकाशः
प्रत्युज्जगामातिथिमातिथेयः ।।

6. अधोलिखितगद्यांशस्य हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत - 4×1=4

ततो ब्राह्मणस्तानि रत्नानि गृहीत्वा उज्जयिनीं यावदागतस्तावद्यज्ञसमाप्तिर्जाता। राजावभृथस्नानं कृत्वा सर्वानर्थिजनान् परिपूर्णमनोरथानकरोत् । ब्राह्मणो राजानं दृष्ट्वा रत्नान्यर्पयित्वा प्रत्येकं तेषां गुणकथनमकथयत्।

**अथवा**

अथाकस्मात् परितो मेघमाला पर्वतश्रेणीव प्रादुरभूत्, क्षणं सूक्ष्मविस्तारा, परतः प्रकटित-शिखरि-शिखर-विडम्बना, अथ दर्शित-दीर्घ-शुण्डमण्डित-दिगन्त-दन्तावल-भयानकाकारा ततः पारस्परिक-संश्लेष-विहित-महान्धकारा च समस्तं गगनतलं पर्यच्छदीत्।

7. अधोलिखितासु सूक्तिषु मात्रद्वयोः सूक्त्योः भावार्थं हिन्दीभाषया लिखत - 2×2=4

(क) यो जन्म दत्तवान्, स जीवितुमधिकारमपि दत्तवान् ।

(ख) निष्क्रष्टुमर्थं चकमे कुबेरात् ।

(ग) उपार्जितानां वित्तानां त्याग एव हि रक्षणम् ।

(घ) प्रोद्दीप्ते भवने च कूपखननं प्रत्युद्यमः कीदृशः।

**अथवा**

अधोलिखितश्लोकस्य अन्वयं मञ्जूषातः उचितपदानि चित्वा पूरयत - 4×1=4

अस्ति यद्यपि सर्वत्र नीरं नीरज-राजितम् ।
रमते न मरालस्य मानसं मानसं विना ॥

**अन्वयः :-**

यद्यपि 1) ................ नीरज-राजितं 2) ..................... अस्ति, (परन्तु) 3) ...................... मानसं 4) ........................ विना न रमते।

**मञ्जूषा**

| नीरम्, सर्वत्र, मानसम्, मरालस्य |
|---|

Downloaded from www.cclchapter.com

8. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि श्लोकात् चित्वा संस्कृतभाषया पूर्णवाक्येन लिखत -
(केवलं प्रश्नत्रयम्) 3×1=3

पापान्निवारयति योजयते हिताय गुह्यं निगूहति गुणान् प्रकटीकरोति।
आपद्गतं च न जहाति ददाति काले सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः।।

**प्रश्नाः -**

(क) सन्मित्रं कस्मात् निवारयति?

(ख) कः गुणान् प्रकटीकरोति?

(ग) "सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः।" अस्मिन् वाक्ये 'प्रवदन्ति' क्रियापदस्य कर्ता कः?

(घ) अत्र 'पुण्यात्' पदस्य विपर्ययः किं पदमस्ति?

9. अधोलिखितं गद्याशं पठित्वा प्रश्नानां उत्तराणि गद्यांशात् चित्वा संस्कृतभाषया पूर्णवाक्येन लिखत -
(केवलं प्रश्नत्रयम्) 3×1=3

तस्य गमनस्य दिवसत्रयात्परं कार्यालये पत्रमेकमागतम्। कौतूहलवशात् श्रीदासः तत्पत्रम् उद्घाटितवान्।

(क) कार्यालये एकं किमागतम् ?

(ख) कः पत्रम् उद्घाटितवान् ?

(ग) 'तस्य' इति पदे का विभक्तिः ?

(घ) 'अपरम्' इति पदस्य किमत्र विलोमपदम् ?

10. कोष्ठकाद् उपयुक्तशब्दं चित्वा रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत - (केवलं प्रश्नचतुष्टयम्)
4×1=4

(क) उपार्जितानां वित्तानां रक्षणं त्यागेन भवति। (केन / कया)

(ख) उत्पथैः मम मनः पारिप्लवं धावति। (कस्मिन् / कस्य)

(ग) अतिजवेन दूरमतिक्रान्तः सः चपलः दृश्यते। (कीदृशः / कीदृशी)

(घ) श्रीदासः तत्पत्रमुद्घाटित्वान्। (कः / का)

(ङ) भगवान् त्वां दीर्घजीवनं कारयतु। (कम् / काम्)

Downloaded from www.cclchapter.com

## (संस्कृत-साहित्य-परिचयः)

11. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया एकपदेन लिखत - (केवलं प्रश्नचतुष्टयम्) 4×1=4

(क) 'ऋतुसंहारे' ............ ऋतूनां वर्णनम् अस्ति।

(ख) महाभारते कति पर्वाणि सन्ति ?

(ग) शिवराजविजयः कीदृशः ग्रन्थः अस्ति ?

(घ) बुद्धचरिते कस्य चरितस्य वर्णनम् अस्ति ?

(ङ) 'दीनबन्धुः श्रीनायारः' अयं पाठः कस्मात् कथासंग्रहात् सङ्कलितः ?

12. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया एकपदेन लिखत - (केवलं प्रश्नचतुष्टयम्) 4×1=4

(क) कालिदासस्य सर्वोत्कृष्टं नाटकं किमस्ति ?

(ख) हर्षचरितस्य रचयिता कः ?

(ग) 'विद्ययाऽमृतमश्नुते' इति पाठः कस्मात् ग्रन्थात् सङ्कलितः ?

(घ) दशकुमारचरितस्य रचयिता कः ?

(ङ) नैषधीयचरितस्य रचयिता कः ?

## खण्डः – 'घ'

## अनुप्रयुक्त-व्याकरणम्

13. (क) गुणसन्धेः अथवा व्यञ्जनसन्धेः परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

(ख) द्विगुसमासस्य अथवा बहुव्रीहिसमासस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

(घ) कर्ताकारकस्य अथवा अधिकरणकारकस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

Downloaded from www.cclchapter.com

## खण्डः – ‘ङ’

## पाठाधारिताः बहुविकल्पीयाः प्रश्नाः

14. अधोनिर्दिष्टेषु प्रश्नेषु प्रदत्तवैकल्पिकचतुर्भ्यः उत्तरेभ्यः एकं शुद्धम् उत्तरं चित्वा लिखत - 17×1=17

1) 'अन्यथेतः' इत्यस्य शब्दस्य कः सन्धिच्छेदः?

क) अन्य + थेतः ख) अन्यथा + ईतः

ग) अन्यथा + इतः घ) अन्यथ + एतः

2) ' कार्यान्न ' इत्यस्मिन् शब्दे कः सन्धिः?

क) गुणसन्धिः ख) हलसन्धिः

ग) विसर्गसन्धिः घ) वृद्धिसन्धिः

3) 'त्वयि + एवम्' इत्यस्य सन्धियुक्तं पदं किम्?

क) त्वय्येवम ख) त्वय्येवम्

ग) त्वयेवम् घ) त्वयियेवम्

4) 'स्थितः' इत्यस्मिन् शब्दे कः प्रत्ययः?

क) तः ख) शानच्

ग) क्त घ) मयट्

5) ' उपदेष्टव्यम्' इत्यस्मिन् शब्दे कः प्रत्ययः?

क) तव्यत् ख) टव्यम्

ग) अनीयर् घ) यत्

6) 'दैष्टिक + तल्' एतेषु संयोगे किं रूपं भवति?

क) देष्टिकता ख) दैषस्टिकता

ग) दैष्टिकता घ) दृष्टिकता

7) 'वाग्भूषणम्' इत्यस्मिन् शब्दे कः समासः?

क) बहुव्रीहिः ख) तत्पुरुषः

ग) अव्ययीभावः घ) कर्मधारयः

8) ' आत्मश्रेयसि ' इत्यस्य शब्दस्य कः विग्रहः?

क) आत्म श्रेयसि ख) आत्मा श्रेयसि

Downloaded from www.cclchapter.com

ग) आत्मस् श्रेयसि		घ) आत्मनः श्रेयसि

9) ' दीर्घा ग्रीवा यस्य सः ' अत्र समस्तपदम् किम्?

क) दीर्घग्रीवा		ख) दीर्घग्रीवः

ग) दीर्घग्रावः		घ) दीर्घग्रीवम्

10) 'अकर्मणः' इत्यस्मिन् शब्दे का विभक्तिः?

क) चतुर्थी		ख) द्वितीया

ग) षष्ठी		घ) सप्तमी

11) 'जगाद' इत्यस्मिन् शब्दे कः लकारः?

क) लिट् लकारः		ख) लृट् लकारः

ग) लोट् लकारः		घ) लङ् लकारः

12) 'विद्वान्' इत्यस्य शब्दस्य पर्यायपदं किम्?

क) प्राज्ञः		ख) कोविदः

ग) मनीषी		घ) उपर्युक्ताः सर्वे

13) 'धीराः' इत्यस्य शब्दस्य पर्यायपदं किम्?

क) मनुष्याः		ख) धैर्यशालिनः

ग) गहनम्		घ) संसारः

14) 'अशुभम्' इत्यस्य शब्दस्य विलोमपदं किम्?

क) माङ्लिकः		ख) शुभम्

ग) दुर्लभम्		घ) कोऽपि नास्ति

15) 'जवीयः' इत्यस्य शब्दस्य विलोमपदं किम्?

क) अल्पज्ञः		ख) शिथिलः

ग) श्रेष्ठः		घ) बुद्धिहीनः

16) 'गहनं तमः' इत्यस्य शब्दस्य किं विशेष्यपदं पाठे प्रयुक्तम् ?

क) यौवनप्रभवम्		ख) फलेषु

ग) दोषजातम्		घ) दिवसेषु

17) 'दोषजातम्' इत्यस्य शब्दस्य किं विशेषणपदं पाठे प्रयुक्तम् ?

क) अतिमलिनम्		ख) गर्भेश्वरत्वम्

ग) गहनम्		घ) नाभिजनम्

Downloaded from www.cclchapter.com